# shrI tantrokta lakShmIkavacham

# શ્રીલક્ષ્મીકવચમ્ તન્ત્રોક્ત

## Document Information

Text title : tantrokta lakShmIkavacham

File name : tantroktalaxmiikavach.itx

Category : kavacha, devii, lakShmI, devI

Location : doc_devii

Author : Traditional

Transliterated by : webD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : September 29, 2005

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 20, 2022

*sanskritdocuments.org*

# શ્રીલક્ષ્મીકવચમ્ તન્ત્રોક્ત

શ્રીગણેશાય નમઃ ।
ૐ અસ્ય શ્રીલક્ષ્મીકવચસ્તોત્રસ્ય, શ્રીઈશ્વરો દેવતા,
અનુષ્ટુપ્ છન્દઃ, શ્રીલક્ષ્મીપ્રીત્યર્થે પાઠે વિનિયોગઃ ।
ૐ લક્ષ્મી મે ચાગ્રતઃ પાતુ કમલા પાતુ પૃષ્ઠતઃ ।
નારાયણી શીર્ષદેશે સર્વાઙ્ગે શ્રીસ્વરૂપિણી ॥ ૧॥

રામપત્ની તુ પ્રત્યઙ્ગે  સદાઽવતુ શમેશ્વરી।
વિશાલાક્ષી યોગમાયા કૌમારી ચક્રિણી તથા ॥ ૨॥

જયદાત્રી ધનદાત્રી પાશાક્ષમાલિની શુભા ।
હરિપ્રિયા હરિરામા જયઙ્કરી મહોદરી ॥ ૩॥

કૃષ્ણપરાયણા દેવી શ્રીકૃષ્ણમનમોહિની ।
જયઙ્કરી મહારૌદ્રી સિદ્ધિદાત્રી શુભઙ્કરી ॥ ૪॥

સુખદા મોક્ષદા દેવી ચિત્રકૂટનિવાસિની ।
ભયં હરતુ ભક્તાનાં ભવબન્ધં વિમુચ્યતુ ॥ ૫॥

કવચં તન્મહાપુણ્યં યઃ પઠેદ્ભક્તિસંયુતઃ ।
ત્રિસન્ધ્યમેકસન્ધ્યં વા મુચ્યતે સર્વસઙ્કટાત્ ॥ ૬॥

એતત્કવચસ્ય પઠનં ધનપુત્રવિવર્ધનમ્ ।
ભીતિર્વિનાશનઞ્ચૈવ ત્રિષુ લોકેષુ કીર્તિતમ્ ॥ ૭॥

ભૂર્જપત્રે સમાલિખ્ય રોચનાકુઙ્કુમેન તુ ।
ધારણાદ્ગલદેશે ચ સર્વસિદ્ધિર્ભવિષ્યતિ ॥ ૮॥

અપુત્રો લભતે પુત્ર ધનાર્થી લભતે ધનમ્ ।
મોક્ષાર્થી મોક્ષમાપ્નોતિ કવચસ્ય પ્રસાદતઃ ॥ ૯॥

ગર્ભિણી લભતે પુત્રં વન્ધ્યા ચ ગર્ભિણી ભવેત્ ।

ધારયેદ્યપિ કણ્ઠે ચ અથવા વામબાહુકે ॥ ૧૦॥

યઃ પઠેન્નિયતં ભક્ત્યા સ એવ વિષ્ણુવદ્ભવેત્ ।
મૃત્યુવ્યાધિભયં તસ્ય નાસ્તિ કિઞ્ચિન્મહીતલે ॥ ૧૧॥

પઠેદ્વા પાઠયેદ્વાઽપિ શ્ૃણુયાચ્છ્રાવયેદ્યદિ ।
સર્વપાપવિમુક્તસ્તુ લભતે પરમાં ગતિમ્ ॥ ૧૨॥

સઙ્કટે વિપદે ઘોરે તથા ચ ગહને વને ।
રાજદ્વારે ચ નૌકાયાં તથા ચ રણમધ્યતઃ ॥ ૧૩॥

પઠનાદ્ધારણાદસ્ય જયમાપ્નોતિ નિશ્ચિતમ્ ।
અપુત્રા ચ તથા વન્ધ્યા ત્રિપક્ષં શ્ૃણુયાદ્યદિ ॥ ૧૪॥

સુપુત્રં લભતે સા તુ દીર્ઘાયુષ્કં યશસ્વિનમ્ ।
શ્ૃણુયાદ્યઃ શુદ્ધબુદ્ધ્યા દ્વૌ માસૌ વિપ્રવક્ત્રતઃ ॥ ૧૫॥

સર્વાન્કામાનવાપ્નોતિ સર્વબન્ધાદ્વિમુચ્યતે ।
મૃતવત્સા જીવવત્સા ત્રિમાસં શ્રવણં યદિ ॥ ૧૬॥

રોગી રોગાદ્વિમુચ્યેત પઠનાન્માસમધ્યતઃ ।
લિખિત્વા ભૂર્જપત્રે ચ અથવા તાડપત્રકે ॥ ૧૭॥

સ્થાપયેન્નિયતં ગેહે નાગ્નિચૌરભયં ક્વચિત્ ।
શ્ૃણુયાદ્ધારયેદ્વાપિ પઠેદ્વા પાઠયેદપિ ॥ ૧૮॥

યઃ પુમાન્સતતં તસ્મિન્પ્રસન્નાઃ સર્વદેવતાઃ ।
બહુના કિમિહોક્તેન સર્વજીવેશ્વરેશ્વરી ॥ ૧૯॥

આદ્યા શક્તિર્મહાલક્ષ્મીર્ભક્તાનુગ્રહકારિણી ।
ધારકે પાઠકે ચૈવ નિશ્ચલા નિવસેદ્ ધ્રુવમ્ ॥ ૨૦॥

॥ ઇતિ તન્ત્રોક્તં લક્ષ્મીકવચં સમ્પૂર્ણમ્ ॥

It is possible that the viniyoga has
ઈશ્વરો ઋષિઃ લક્ષ્મિર્દેવતા .
However, in our search we did not find a clear
indication of viniyoga details, including
shakti, kIlakam et cetera.

Some prints start directly on the kavacha
text do not have anything earlier.

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrI tantrokta lakShmIkavacham*

pdf was typeset on November 20, 2022

Please send corrections to *sanskrit@cheerful.com*